वियोज्य DETACHABLE

संस्कृतम् (द्वितीयं प्रश्नपत्रम्)
(साहित्यम्)

SANSKRIT (Paper II)
(LITERATURE)

समयः : होरात्रयम् (घंटा-त्रयम्)
Time Allowed : Three Hours

पूर्णांकाः : 250
Maximum Marks : 250

प्रश्नपत्र-संबन्धिताः विशेषनिर्देशाः

कृपया प्रश्नोत्तरलेखनात् पूर्वं निम्नलिखितनिर्देशाः सावधानतया पठनीयाः ।

खण्डद्वये विभाजिताः **अष्टौ प्रश्नाः** ।

परीक्षार्थिभिः **पञ्चैव** प्रश्नाः समाधेयाः ।

प्रथम-पञ्चमौ प्रश्नौ अपरिहार्यौ । अवशिष्टेषु प्रश्नेषु **त्रयः प्रश्नाः** समाधेयाः । प्रतिखण्डम् **एकः प्रश्नः** अवश्यं ग्रहणीयः ।

प्रश्नानां तद्भागानां वा मूल्याङ्काः प्रश्नस्थले एव निर्दिष्टाः ।

चतुर्थ-पञ्चम-षष्ठप्रश्नाः संस्कृतभाषायां देवनागरीलिप्या समाधेयाः । अवशिष्टप्रश्नानामुत्तरं **संस्कृतभाषायां** देवनागरीलिप्या अथवा परीक्षाप्रवेश-प्रमाणपत्रे स्वीकृतया कयाचिद्भाषया प्रदेयम् ।

प्रश्नोत्तरार्थं निर्दिष्टा पदानां संख्या परिपालनीया ।

यदि प्रश्नोत्तरपुस्तिकायां कोपि पृष्ठः अंशो वा रिक्तः (अलिखितः) स्यात्तर्हि तत्र स्पष्टरूपेण व्यत्यासचिह्नं (×) विधेयम् ।

प्रश्नक्रमानुसारमेव क्रमेण प्रश्नोत्तराणि प्रदेयानि । न चेत् अंशतः प्रदत्तं प्रश्नोत्तरमपि संपूर्णप्रश्नोत्तरवत् परिगणितं भवेत् ।

QUESTION PAPER SPECIFIC INSTRUCTIONS

Please read each of the following instructions carefully before attempting questions :

There are **EIGHT** questions divided in **TWO SECTIONS.**

Candidate has to attempt **FIVE** questions in all.

Questions No. **1** and **5** are compulsory and out of the remaining, **THREE** are to be attempted choosing at least **ONE** from each Section.

The number of marks carried by a question/part is indicated against it.

Questions No. **4, 5** and **6** must be answered in **SANSKRIT** and the remaining questions must be answered either in **SANSKRIT** or in the medium authorized in the Admission Certificate. Answers written in **SANSKRIT** must be in Devanagari script.

Word limit in questions, wherever specified, should be adhered to.

Any page or portion of the page left blank in the Question-cum-Answer Booklet must be clearly struck off.

Attempts of questions shall be counted in sequential order. Unless struck off, attempt of a question shall be counted even if attempted partly.

Optional Province · optionalprovince.com

खण्डः 'A' SECTION 'A'

1. अधोनिर्दिष्टानां विषयाणां पर्यालोचनं सोदाहरणं प्रत्येकं सार्धशतेन (150) शब्दैः विधीयताम् । 10×5=50

1.(a) रघुवंशमहाकाव्यस्य काव्यसौष्ठवं विशद्यताम् । 10

1.(b) 'भारवेरर्थगौरवम्' इत्येतन्मतं सयुक्तिकं सोदाहरणं परीक्ष्यताम् । 10

1.(c) 'नैषधे पदलालित्यम्' इत्येषा सूक्तिः युक्तिपुरस्सरं विवेचनीया । 10

1.(d) 'कादम्बरीरसज्ञानामाहारोऽपि न रोचते' इति वचसः आशयो विव्रियताम् । 10

1.(e) श्रीधरभास्करवर्णेकर-प्रणीतस्य शिवराज्योदयमहाकाव्यस्य वैशिष्ट्यं निरूप्यताम् । 10

2. अधोनिर्दिष्टानां विषयाणां सारगर्भितां समीक्षां कुरुत — 15+15+20=50

2.(a) ईशावास्योपनिषदि प्रतिपादितं विद्याविद्ययोः स्वरूपं विवेचनीयम् । 15

2.(b) कौटिलीयार्थशास्त्रस्य साम्प्रतिकम् उपादेयत्वं वर्ण्यताम् । 15

2.(c) गीतायां प्रतिपादितं निष्कामकर्मयोगं वर्णयत । 20

3. अधस्तात् निर्दिष्टानां विषयाणां समीक्षा विधेया । 15+15+20=50

3.(a) 'स्वप्नवासवदत्तम्'नाम्नि नाटके स्वप्नदृश्यस्य नाट्यदृशा महत्त्वं प्रतिपाद्यताम् । 15

3.(b) 'कारुण्यं भवभूतिरेव तनुते' इति वचः उत्तररामचरितप्रसंगे समीक्ष्यताम् । 15

3.(c) चरित्रचित्रणप्रधानेषु रूपकेषु मृच्छकटिकस्य वैशिष्ट्यं विशद्यताम् । 20

4. अधस्तनानां विवेचनं संक्षेपेण **संस्कृतभाषयैव** देवनागरीलिप्यामेव च कर्तव्यम् । 15+15+20=50

4.(a) 'पञ्चतन्त्रे राजनयः लोकनयश्च प्रतिपादितौ' इति मतं सयुक्तिकं समीक्ष्यताम् । 15

4.(b) अमरुकशतकस्य काव्यवैशिष्ट्यं विविच्यताम् । 15

4.(c) 'ऐतिहासिककाव्येषु राजतरंगिण्याः किमपि विशिष्टं स्थानम्' इत्येतद् वचः परीक्ष्यताम् । 20

Optional Province · optionalprovince.com

खण्डः 'B' SECTION 'B'

5. नागराक्षरैः **संस्कृतभाषायां** प्रत्येकं सार्धशतेन (150) शब्दैः व्याख्यायताम् — 10×5=50

5.(a) यथाविधिहुताग्नीनां यथाकामार्चितार्थिनाम् ।
यथापराधदण्डानां यथाकालप्रबोधिनाम् ॥ 10

5.(b) तं सन्तः श्रोतुमर्हन्ति सदसद्व्यक्तिहेतवः ।
हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकापि वा ॥ 10

5.(c) न्यस्ताक्षरा धातुरसेन यत्र भूर्जत्वचः कुञ्जरबिन्दुशोणाः ।
व्रजन्ति विद्याधरसुन्दरीणामनङ्गलेखक्रिययोपयोगम् ॥ 10

5.(d) द्विषां विघाताय विधातुमिच्छतो रहस्यनुज्ञामधिगम्य भूभृतः ।
स सौष्ठवौदार्यविशेषशालिनीं विनिश्चितार्थामिति वाचमाददे ॥ 10

5.(e) सखीनिव प्रीतियुजोऽनुजीविनः समानमानान् सुहृदश्च बन्धुभिः ।
स सन्ततं दर्शयते गतस्मयः कृताधिपत्यामिव साधु बन्धुताम् ॥ 10

6. अधोनिर्दिष्टानां व्याख्या नागराक्षरैः **संस्कृतभाषायामेव** विधेया — 15+15+20=50

6.(a) हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम् ।
तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये ॥ 15

6.(b) प्रियं जनमपश्यन्तीं पश्यन्तीं राक्षसीगणम् ।
स्वगणेन मृगीं हीनां श्वगणेनावृतामिव ॥ 15

6.(c) वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि ।
तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही ॥ 20

7. अधोलिखितानामाशयः ससंदर्भं प्रतिपादनीयः । 15+15+20=50

7.(a) तस्य स्थित्वा कथमपि पुरः कौतुकाधानहेतो-
रन्तर्वाष्पश्चिरमनुचरो राजराजस्य दध्यौ ।
मेघालोके भवति सुखिनोऽप्यन्यथावृत्ति चेतः
कण्ठाश्लेषप्रणयिनि जने किं पुनर्दूरसंस्थे ॥ 15

7.(b) प्रसह्य मणिमुद्धरेन्मकरवक्त्रदंष्ट्रान्तरात्
समुद्रमपि संतरेत् प्रचलदूर्मिमालाकुलम् ।
भुजङ्गमपि कोपितं शिरसि पुष्पवद् धारयेन्
न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत् ॥ 15

Optional Province · optionalprovince.com

7. (c) अपगतमले हि मनसि स्फटिकमणाविव रजनिकरगभस्तयो विशन्ति सुखेनोपदेशगुणाः । गुरुवचनममलमपि सलिलमिव महदुपजनयति श्रवणस्थितं शूलमभव्यस्य । इतरस्य तु करिण इव शङ्खाभरणमाननशोभासमुदयमधिकतरम् उपजनयति । 20

8. अधोलिखितानां पद्यानां प्रसङ्गनिर्देशपूर्वकं व्याख्या कार्या । 15+15+20=50

8. (a) अभिजनवतो भर्तुः श्लाध्ये स्थिता गृहिणीपदे
विभवगुरुभिः कृत्यैस्तस्य प्रतिक्षणमाकुला ।
तनयमचिरात् प्राचीवार्कं प्रसूय च पावनं
मम विरहजां न त्वं वत्से शुचं गणयिष्यसि ॥ 15

8. (b) कातरा येऽप्यशक्ता वा नोत्साहस्तेषु जायते ।
प्रायेण हि नरेन्द्रश्रीः सोत्साहैरेव भुज्यते ॥ 15

8. (c) अद्वैतं सुखदुःखयोरनुगतं सर्वास्ववस्थासु यद्
विश्रामो हृदयस्य यत्र जरसा यस्मिन्नहार्यो रसः ।
कालेनावरणात्ययात्परिणते यत्स्नेहसारे स्थितं
भद्रं तस्य सुमानुषस्य कथमप्येकं हि तत्प्राप्यते ॥ 20

Optional Province · optionalprovince.com